



# 25

309sk25

# परियोजना&निर्माणम्

वयं पश्यामः यत् नगरेषु/उपनगरेषु स्थाने स्थाने 'परियोजना' शब्दः लिखितः वर्तते। अद्यत्वे अनेके शिक्षिताः युवकाः सन्ति। यदि कोऽपि कमपि पृच्छति 'सम्प्रति' भवान् किं करोति? सः वदति– 'अहम् एकस्यां परियोजनायां कार्यं करोमि। समाचारपत्रेषु अपि वयं पठामः यत् सर्वकारेण अमुककार्याय यथा विद्युतीकरणाय एका परियोजना प्रस्तुता। किं भवन्तः जानन्ति परियोजना का भवति? कथं च सा निर्मीयते? अस्तु, अस्मिन् पाठे वयं परियोजनायाः विभिन्नेषु पक्षेषु विचारयामः शिक्षामः च 'परियोजना' कथं निर्मीयते?

## उद्देश्यानि

**इमं पाठं पठित्वा भवान्–**

- 'परियोजना' का भवति इति स्पष्टयितुं शक्ष्यति;
- परियोजनायाः महत्त्वं वर्णयितुं शक्ष्यति;
- परियोजनायाः विविधानि रूपाणि ज्ञातुं शक्ष्यति;
- परियोजनायाः विशेषताः उल्लेखिष्यति;
- परियोजनायाः निर्माणं कर्तुं समर्थः भविष्यति।



## क्रियाकलापः

भवद्भिः अवश्यमेव कुत्रचित् 'परियोजना' शब्दः श्रुतः, पठितः स्यात्। अतः श्रुतासु पठितासु वा परियोजनासु कयोश्चित् द्वयोः पूर्णनामसङ्केतः अत्र कार्यः।

1. ...........................................

2. ...........................................

## 25.1 अधुना अवगच्छामः

### परियोजना&निर्माणम्

## कास्ति परियोजना

भवान् विद्यालये शिक्षां प्राप्नोति। तत्र कदाचित् सांस्कृतिककार्यक्रमाः, कदाचित् खेलकार्यक्रमाः, कदाचित् उत्सवाः, कदाचित् अवकाशाः, विद्यालयं गमनागमने चापि समयः लगति, गृहेऽपि मातृ–पित्रोः कार्यम्, अतिथि सत्कारः, सम्बन्धीनां गृहं प्रति माङ्गलिककार्यावसरे आगमनं, मित्रैः सह भ्रमणम् इत्यादयः समयापेक्षिताः कार्यक्रमाः भवन्ति एव। एतेन पठने शिक्षणे च बाधा उत्पन्ना भवति। अतः एतया बाधया खिन्नः भवान् कथम् अनुभविष्यति किं करिष्यति च?

एवमेव नगरेषु/महानगरेषु यातायातसमस्या प्रतिदिनं भवति एव। मार्गेषु महान् जनसम्मर्दः भवति; वाहनानि अपि विविधानि विपुलानि च भवन्ति। अतः गमनागमनं सुकरं न भवति। कार्यालयं इष्टस्थानं वा समयेन प्रापणम् प्रायः प्रतिदिनमेव दुष्करं भवति। समाचारपत्रेषु अपि ईदृशीं समस्यां वयं प्रतिदिनं पठामः एव। तद्विषये चित्राणि अपि पश्यामः। एतत्सर्वम् अनुभूय भवान् अपि कामपि समुचितां व्यवस्थां कारयितुम् उपायान् चिन्तयिष्यति एव। एतादृशाः विचाराः यदा मनसि आयान्ति, तर्हि ते विचाराः 'योजना' इति शब्देन व्यवह्रियन्ते। यदा च एतादृशान् विचारान् लिखित्वा कार्यरूपेण वा प्रस्तौमः तदा ते विचाराः/उपायाः लिखिताः 'परियोजना' इति शब्देन कथ्यते।

'परियोजना' शब्दे योजनात् पूर्वं 'परि' उपसर्गः अस्ति। 'परि' उपसर्गस्य अर्थः अस्ति 'पूर्णता'। 'परियोजना' शब्दस्य अर्थः अस्ति – ''कमपि विचारं व्यवस्थितरूपेण प्रस्तुतीकरणम्''। आंग्लभाषायां तु परियोजना कृते 'प्रोजेक्ट' इति शब्दः प्रयुज्यते। अस्य शब्दस्य अर्थः अस्ति – 'प्रकाशनम्'। एवं हि परियोजना तु कस्याश्चित् समस्यायाः निदानम् अथवा कस्यापि विषयस्य तथ्यान् प्रकाशयितुं संसाधिका, एका पूर्णविचारयोजना भवति।

## परियोजनायाः स्वरूपम्

परियोजनायाः निर्माणं विविधं भवितुं शक्यते। प्रतिव्यक्तिम् कार्यप्रणाली विविधा भवति। यथा वार्तालापः, आहारः, व्यवहारः च प्रत्येकं जनस्य पृथक् पृथक् भवति। एवमेव कवितालेखनम्, कथा–कथनम्, चित्रनिर्माणं पृथगेव भवति। पुनरपि परियोजना स्थूलरूपेण



टिप्पणी

भागद्वये विभक्तुं शक्यते। प्रथमा तु– याः परियोजनाः समस्यानां निदानाय निर्मिताः भवन्ति, अपरा च–याः कस्यापि विषयस्य समुचितं ज्ञानं प्रदातुं निर्मीयन्ते।

समस्यामूलक–परियोजनासु समबद्धसमस्यायाः प्रत्येकं तथ्यम् आश्रित्य विचारः क्रियते तस्याः समस्यायाः समाधानाय च परामर्शाः अपि दीयन्ते। एतादृश्यः परियोजनाः तु सर्वकारेण संगठनैः वा कामपि समस्यामाधृत्य कार्ययोजना–निर्माणकाले एव निर्मीयन्ते। एतेन तस्याः समस्यायाः विभिन्नपक्षेषु कार्यं कर्तुं सौविध्यं जायते।

द्वितीया परियोजना तु शैक्षिकपरियोजना कथ्यते। एतादृशीनां परियोजनानां निर्माणकाले भवान् संबंधितविषयस्य तथ्यान् संगृह्य अनेकैः नूतनैः विषयैः स्वयमेव परिचितः भवति। शैक्षिक–परियोजना भगद्वये विभक्तुं शक्यते –

(क) पाठेन सम्बद्धपरियोजनाः, ख) शुद्धज्ञानस्य विषयेषु आधारिताः परियोजनाः।

भवतः पाठ्यपुस्तके 'कल्पनाकीर्तिर्विजयते' इति पाठः नारीजातेः गौरवमयम् इतिहासं प्रस्तौति। भवान् भारतस्य अनेकासां वीरांगनानां सामाजिक–योगदानम् आश्रित्य विशिष्टाः सामग्रीः संगृह्णातु। प्रसिद्धानां महिलानां चित्राणि संगृह्य क्रमशः तासां विवरणं विलिखन् तेषां संयोजनं करोतु। एवं हि पाठाधारिता परियोजना सज्जिता। अनेनप्रकारेण कमपि पाठम् आधृत्य भवान् परियोजनानिर्माणं कर्तुं शक्नोति।

परं काश्चन परियोजनाः शुद्धज्ञानेन सम्बद्धाः भवन्ति। एतादृशीनां परियोजनानां सम्बन्धः सरलतया पाठेन सह न भवति। परं पाठस्य सम्बद्धान् विविधान् तथ्यान् ज्ञातुं शक्नुमः । एतादृशीनां परियोजनानाम् उद्देश्यम् अस्ति – "पठितिपाठस्य तथ्यात्मकज्ञानं प्रति जागरूक–करणम् अथवा भवतः अभिव्यक्तिकौशलस्य विकासकरणम्। एवं हि शुद्धज्ञानस्य परियोजना तु भवता पठितपाठानाम् अवबोधने, पाठ्यपुस्तकात् प्राप्तज्ञानस्य सम्यक् संवर्धने, भवतः अभिव्यक्ति–कौशलस्य संवर्धने च साहाय्यं करोति।

एवं हि भवता अनुभूतमेव यत् 'परियोजना' अपि एकः क्रियाकलापः एव। परम् अस्य क्षेत्रं विशालं भवति।

## 25.2 परियोजनायाः महत्त्वम्

'परियोजना' शिक्षायाः एकं महत्त्वपूर्णम् अङ्गम् अस्ति। 'परियोजनायाः निर्माणे छात्रः आनन्दम् अनुभवति। खेलभावनया यत् शिक्षणं चलति, तेन परियोजना सज्जिता भवति। यथा हि 'होलीपर्व' देशे विदेशे च विविधरूपेण सम्मान्यते। विभिन्नसमाचारपत्रेषु पत्रिकासु च तद्विषये अनेकानि चित्राणि लेखानि च प्रकाश्यन्ते। तेषां संग्रहः अपि एका परियोजना। एतेन होलीपर्वणः उत्सवस्य विविधरूपं तथ्यानि च सहजरूपेण मनोर×जनपूर्वकं जानीमः।

परियोजना तु पाठ्यपुस्तकातिरिक्तम् अपि विश्वजनीनं ज्ञानं प्रयच्छति। एषा तु नूतन–तथ्यानां चयनस्य विचारस्य च अवसरं ददाति। एवं हि भवत्सु नूतन–तथ्यान् प्रति जिज्ञासा जायते, स्वविचाराणां प्रकटन–कौशलस्य च विकासः भवति। लेखनसंबंधे

नूतन–शैलीनां विकासः भवति। एवं पूर्वघटनायाः वर्तमानघटनया सह संयोजनेन चिन्तनशक्तेः अपि विकासः जायते।

## पाठगतप्रश्नाः 25.1

प्रदत्तविकल्पेषु उचितं विकल्पं चित्वा प्रश्नान् उत्तरत

1. कीदृशान् विषयान् आधृत्य परियोजना न निर्मीयते?
   (क) भावनाप्रधानम् (ख) सामाजिकम्
   (ग) आर्थिकम् (घ) समस्याप्रधानम्
2. परियोजनां निर्मातुं मुख्याधाराः के सन्ति?
   (क) भावना चित्राणि च
   (ख) तथ्यानि, चित्राणि, अभिव्यक्तिः, मानाङ्काः (आंकड़े)
   (ग) केवलं चित्राणि मानाङ्काः (आंकड़े)
   (घ) तथ्यानि भावना च
3. शुद्धज्ञानाधारिताः परियोजनाः तु भवन्ति
   (क) पाठाधारिताः (ख) चित्राधारिताः
   (ग) अभिव्यक्तिकौशलस्य संवर्धने सहायिकाः (घ) पाठस्य तथ्येतरज्ञानाय

## 25.3 परियोजना&अनुच्छेदयोः भेदः

भवान् एवमपि चिन्तयितुं शक्नोति यत् कस्याश्चित् समस्यायाः निदानाय अनुच्छेदः अपि लेखितुं शक्यते। वस्तुतः अनुच्छेदलेखने भवान् स्व भावनाः व्यक्तुं पूर्णः स्वतंत्रः भवति, एवमेव अनुच्छेदः तु क्रिकेटम्, परोपकारः, सत्यम्, सत्संगतिः, किमपि पर्व, किमपि दृश्यम्, विद्या, सदाचारः, इत्यादीन् विषयान् आधृत्य लेखितुं शक्यते परं परियोजनालेखने भावनानाम् अभिव्यक्तेः अवकाशः न भवति। एवमेव केवलं कोऽपि विषयः एव अपेक्षितः न भवति अपितु परियोजना–निर्माणात् पूर्वं तथ्यानां संग्रहः, समाचारपत्रेषु मुद्रितानां चित्राणां संकलनं, तेषाम् उपरि च सम्यक् विश्लेषणम् अपेक्षितं भवति। परियोजनालेखने सदैव प्रामाणिकतथ्यानां प्रस्तुतीकरणम् अनिवार्यं भवति। तथैव चित्राणां, संदर्भाणां, सर्वकारपक्षतः विज्ञापितानां तथ्यानां, विचाराणाम्, उद्देश्यानाम् अपि प्रयोगः अपेक्षितः भवति। परम् अनुच्छेदलेखने एतत्सर्वं नैवापेक्षितं भवति। परं संस्कृतसाहित्यात् किमपि विषयम् आधृत्य सूक्तीनां संकलनं परियोजनाकार्यान्तर्गतम् आयाति।

एवं हि अनुच्छेदलेखनापेक्षया 'परियोजना' तु अधिका वैज्ञानिकी भवति। 'चेदहं प्रधानमंत्री स्याम्' एषः विषयः भावनाप्रधानः। परं सामाजिक–आर्थिक–भौगोलिकविषयान् समस्याप्रधानविषयान् आधृत्य 'परियोजना' निर्मातुं' शक्यते।

## 25.4 परियोजनायाः विशेषताः

परियोजनायाः निम्नलिखिताः विशेषताः सन्तिः

- परियोजना तु कस्या अपि समस्यायाः निदानाय अथवा कस्यापि विषयस्य वैशिष्ट्यं तथ्यात्मकं ज्ञानं प्रदातुं निर्मिता भवति।
- शैक्षिक–परियोजना तु खेलभावनया शिक्षणे कौशलं प्राप्तुं समुचितम् अवसरं प्रयच्छति।
- परियोजना मुख्यतः तथ्येषु आधारिता भवति।
- परियोजनायां स्वभावनानाम् अभिव्यक्तेः सम्भावना नापेक्ष्यते।
- परियोजनायाः निर्माणाय विषयस्य चयनस्य पूर्णं स्वातन्त्र्यं भवति, तन्निर्माणाय च पर्याप्तः अवसरः मिलति।

## पाठगतप्रश्नाः 25.2

1. परियोजना लिख्यते

   (क) परीक्षाभवने (ख) अल्पसमये

   (ग) अध्ययन केन्द्रे (घ) पर्याप्ते समये

2. शैक्षिकः परियोजनायाः वैशिष्ट्यमस्ति यदस्याम्

   (क) कल्पनायाः उन्नतिः / वैशिष्ट्यं प्रस्तूयते

   (ख) 'खेल–खेल' इति रूपेण किमपि शिक्ष्यते।

   (ग) भावनाः अभिव्यक्ताः भवन्ति।

   (घ) प्रमाण–प्रदानस्य आवश्यकता न भवति

3. परियोजनानिर्माणात् पूर्वम् आवश्यकम् भवति –

   (क) काल्पनिकविषयः (ख) समाचारपत्राणि

   (ग) सर्वकारस्य सहमतिः (घ) प्रामाणिकतथ्यानां संग्रहः

## 25.5 परियोजना कथं निर्मातव्या

सर्वप्रथमं परियोजनां निर्मातुं विषयस्य चयनम् सम्यक् विचार्य एव करणीयम्। विषयस्य चयनं रुचिपूर्णं भवेत् येन तत्कार्यं कुर्वन् आनन्दानुभूतिः भवेत्।

- परियोजनायाः विषयस्य सम्यक् अवबोधः स्यात्।
- समस्यासम्बन्धितचित्राणि प्राप्तव्यानि।

- विषयस्य संबंधिनः तथ्याः संग्राह्याः
- समाचारपत्रेषु मुद्रिताः समाचाराः एकत्रीकरणीयाः।
- यदि किमपि ग्राफिकम्/रेखाचित्रम् उपलब्धं भवेत् तदपि प्राप्तव्यम्।
- परियोजना–निर्माणात् पूर्वम् एका विशिष्टा भूमिका लेखनीया / तदाधृत्य परियोजना निर्मातव्या।
- मानाङ्कान् (आंकड़े) आधृत्य समस्यायाः विविधपक्षाणां विश्लेषणं कर्तव्यम्।
- विश्लेषणं सम्यक् सुविचारितं भवेत्।
- समस्या/काऽपि वार्ता प्रामाणिकी भवेत् केनचित् श्रुता न भवेत्। उत्तरदायित्वपूर्णः विशिष्टः जनः (प्रधानमंत्री, राज्यपालादयः) यदि किमपि भाषेत् तत्तु प्रामाणिककथनरूपेण उल्लेखनीयम्।

उपर्युक्तचिन्तनेन ज्ञायते यत् 'परियोजना' मुख्यतः द्विधा भवति–प्रथमा तु कस्या अपि समस्यायाः निदानाय द्वितीया च कस्यापि विषयस्य समुचिताम् अवगतिं प्रदानाय। अस्तु अत्र परियोजनाद्वयस्य निर्माणविषये जानीमः।

### (क) समस्याप्रधानपरियोजना

भवन्तः समाचारपत्रेषु/दूरदर्शने च देशे खाद्य–समस्या, पेयजल समस्या विद्युत्–आपूर्तिसमस्या इत्यादीनां विषये पठन्ति शृण्वन्ति च। यदि भवान् 'पेयजल समस्या' विषयाधारितां परियोजनां लेखितुम् इच्छति, तर्हि सर्वप्रथमम् एतत्समस्या–सम्बन्धिनः समस्तान् बिन्दून् बुद्ध्वा क्रमेण ते विश्लेषणीयाः। तस्याः समस्यायाः मानाङ्काः (आंकड़े) एकत्रीकरणीयाः।

वयं पश्यामः यत् देशे पेयजलसमस्या अनेककारणात् सञ्जाता। देशे पर्याप्ता वर्षा न भवति। वर्षाभावात् नदीनां जलस्तरः न्यूनः जायते। भूमेः अन्तः स्थितः जलस्तरः अधिकं नीचैः गच्छति। प्राकृतिकजलस्रोतसां कूप–तडागादीनां शुष्कतां प्रापणम्, जनसंख्यावृद्धिः, औद्योगिकविकासात् महता प्रदूषणेन जलस्य अपेयत्वम्, जागरूकतायाः अभावात् जनैः कृतः जलस्य दुरुपयोगः, अपव्ययः च। एवं हि देशे पेयजलसमस्याकृते अनेकानि प्रमुखानि कारणानि सन्ति।

एतद् विषयिकीं परियोजनां लेखितुं भवान् किं किं करिष्यति? आम्, अस्याः समस्यायाः विषये विविधपक्षतः मानाङ्काः (आंकड़े) एकत्रीकरणीयाः। एतत्समस्यासम्बन्धिनः समाचारपत्रेषु प्रकाशिताः लेखाः, सर्वकारेण पेयजल समस्यायाः निदानाय प्रदत्तानि विज्ञापनानि, चित्राणि, भाषणानि प्राप्तव्यानि। एवं हि दिल्ली राजस्थान–मध्यप्रदेश–बुंदेलखण्डक्षेत्रेषु प्रायः प्रतिवर्षं तत्र पेयजलसमस्यायाः विषये समाचारपत्रेषु पठन्ति एव। सर्वेभ्यः पातुं जलं न मिलति। नलकेभ्यः जलं न निस्सरति। जनाः स्वाक्रोशं प्रकटयन्ति। महिलाः दूरस्थात् स्थानात् शिरसि घटं निक्षिप्य जलम् आनयन्ति। एतद्विषयकानि चित्राणि पत्र–पत्रिकासु

भवान् पश्यति एव। सर्वकारेण एतादृश्याः समस्यायाः समाधानाय कीदृशाः उपायाः कृताः? सर्वकारद्वारा संचालितप्रयासेषु कियत् साफल्यं प्राप्तम् कियत् च असाफल्यम्?

भवान् एतत्सर्वं विज्ञाय 'देशे पेयजलसमस्या' विषयमधिकृत्य परियोजनाकार्यं करोतु। अन्ते भवान् एतत्पेयजलसमस्यायाः निदानाय स्वविमर्शमपि प्रस्तुतं करोतु। यथा वर्षायाः जलस्य भाण्डारणम् प्रदूषणात् नदीनां रक्षणम्, जलस्रोतसां समुचितः विकासः, पेयजलस्य दुरुपयोगस्य अपव्ययस्य च अवरोधनम्, जलस्य राजकीयसंरक्षणम्, समाजे जलसंरक्षणं प्रति जागरूकता। एवं हि सर्वं क्रमशः तथ्यानां निरूपणेन 'पेयजलसमस्या' सम्बन्धिनी परियोजना सज्जिता भविष्यति; भवान् आनन्दम् अपि अनुभविष्यति।

### (ख) शुद्धज्ञानवर्द्धकविषया परियोजना

भवतः पाठ्यपुस्तके अनेके पाठाः सन्ति यान् आधृत्य भवान् शुद्धज्ञानवर्द्धकविषयिणीं परियोजनां लेखितुं शक्नोति। यथा हि "राजते खलु कन्याकुमारी" पाठमाधृत्य कन्याकुमारी क्षेत्रस्य/स्वामिविवेकानन्दस्य सर्वविधं ज्ञानवर्द्धकं परियोजनाकार्यं कर्तुं शक्नोति। एवमेव 'कल्पनाकीर्तिर्विजयते' अयं पाठः कल्पनाचावलामाश्रित्य लेखितः। भवान् ईदृशीनां अन्यासां नारीणां देशाय योगदानम् इति विषयम् आधृत्य शुद्धज्ञानवर्द्धिकां परियोजनां विविधचित्राणां सहायतया सुन्दररूपेण प्रस्तोतुं शक्नोति। एवमेव 'यदि जानासि तद् वद' पाठमाधृत्य संस्कृतसाहित्यात् विविधाः प्रहेलिकाः विषयक्रमेण संचित्य सचित्रम् 'प्रहेलिका कोषः' इति रूपं परियोजनाकार्यं ज्ञानवर्द्धकं भवेत्। एवमेव 'लोकोक्तीनाम् अपि सङ्कलनम्' परियोजनाकर्यरूपेण प्रस्तोतुं समुचितमेव। एवमेव कापि दैनिक घटना या जीवनमूल्यदृष्ट्या प्रेरणाप्रदा कापि वार्ता परियोजनायाः विषयः भवितुमर्हति। अतः एतादृशं परियोजनाकार्यं तु सामाजिकजागरूकतां, निरन्तरं चिन्तनं प्रति प्रेरयति। एवं हि परियोजनायाः अनेके विषयाः भवितुं शक्नुवन्ति। एतादृशीभिः परियोजनाभिः रोचकं ज्ञानं प्राप्यते। समस्याप्र–धानपरियोजनावत् एतादृशीषु परियोजनासु भवतः परामर्शाः नैवापेक्षिताः भवन्ति।

## 25.6 परियोजना–निर्माण–प्रक्रिया–प्रारूपम्

अस्तु, अत्र 'भारते होली पर्व' विषयमाधृत्य निर्मितां सज्जिताम् एकां परियोजनाम् अवगच्छामः।

## भारते होली पर्व

### भूमिका



25.1

भारतम् एकः महान् देशः। अत्र विविधभाषाभाषिणः, विभिन्नधर्मावलम्बिनः अनेकसंस्कृतिप्रियाः जनाः निवसन्ति। अत्र विभिन्नपर्वाणि महता उत्साहेन मान्यन्ते। यथा– होली,

दीपावली, रक्षाबन्धनम्, विजयदशमी (दशहरा), वैशाखी, क्रिसमसम्, पोंगलम् आदीनि। ऐतेषु 'होली' भारतीयानां प्रियं पर्व अस्ति। इदं पर्व सम्पूर्णे भारते केनचित् स्थानभेदेन सह मान्यते।

**उद्देश्यम्**



25.2

होलीपर्वणः विषये मान्यताऽस्ति यत् पुरा हिरण्यकशिपुः एकः दैत्यानां राजा अभवत्। सः आत्मानं ईश्वरं मन्यते स्म। सः प्रजापीडकः अत्याचारी चाभवत्। तस्य पुत्रः प्रह्लादः हरिभक्तः आसीत्। एतस्मात् कारणादेव सः तं दण्डयितुं निश्चयम् अकरोत्। सः स्वभगिनीं होलिकाम् आदिशत् यत् सा प्रह्लादम् अङ्के उपवेश्य अग्नौ तिष्ठेत्। वरदानकारणात् होलिका अग्नौ न ज्वलिष्यति। परम् ईश्वरकृपया प्रह्लादः सुरक्षितः जातः, होलिका तु दग्धा जाता। तदा कालतः एव इदं पर्व मान्यते। इदं तु फाल्गुनमासस्य पूर्णिमायाम् मान्यते। पूर्णिमायां रात्रौ होलिकादहनम् काष्ठानि संयोज्य क्रियते। अपरस्मिन् दिवसे 'धुलहण्डी' धूलिवन्दनम् रंगोत्सत्वश्च मान्यते। जनाः परस्परं शत्रुभावं विस्मृत्य अबीर–गुलालादिभिः विविधवर्णैः मुखं शरीरं च र×जयन्ति। सर्वे वर्णभेदं (जातिभेदं) विस्मृत्य प्रेम्णा हर्षेण एकवर्णाः भवन्ति।

कस्मिश्चिंत् युगे होली तु 'नवान्नेष्टि' यज्ञः कथ्यते स्म। वसन्तऋतोः प्रमुखं पर्व इदम्। जनाः नूतन यव–गोधूम–चणकान् क्षेत्रेभ्यः आनीय होलिकाग्नौ जुह्वति। एतेन नवान्नयज्ञः प्रारभ्यते। जनाः हुतशेषं भक्षयन्ति। जनाः विविधैः वाद्यैः सह 'फागगीतम्' अपि गायन्ति नृत्यन्ति च। नार्यः दिने होलिकापूजनं कुर्वन्ति। कुत्रचित् होलिकाग्निं गृहमानीय स्थापयन्ति।

**होलीपर्वणः विविधानि रूपाणि**



25.3

यद्यपि भारते होलीपर्वणः उद्देश्यम् एकमेव, परं विभिन्नप्रान्तेषु किमपि वैशिष्ट्यं दृश्यते एव। भवान् अपि दूरदर्शने, समाचारपत्रेषु अस्योत्सवस्य विषये पश्यति एव, पठति एव च। इदं पर्व प्रायः सर्वत्र रंगोत्सवः नूतनान्नेष्टिः इति रूपेण मान्यते। परं व्रजक्षेत्रे अस्य वैशिष्ट्यम् दृश्यते। तत्र गोकुल–नंदगाँव वरषाना क्षेत्रे नार्यः यष्टिकाभिः पुरुषपक्षम् ताडयन्ति पुरुषाः चात्मरक्षां कुर्वन्ति। एवमेव कश्चन पण्डाविशेषः होलिकाग्नेः मध्यात् अदग्धः निस्सरति।



25.4

दिल्ल्याम् अन्यप्रान्तेषु च होलीमिलनसमारोहाः अपि आयोज्यन्ते। अस्मिन् अवसरे कविसम्मेलनम्, उपाधिवितरणम्

(परिहासरूपेण) क्रियते। पंजाबप्रदेशे 'होला' कार्यक्रमः सम्पाद्यते। हरियाणाक्षेत्रे भ्रातृजायाभिः अन्याभिः च देवरः, सम्बन्धिनः, कशाघातेन यष्टिकया वा ताड्यन्ते। दक्षिणभारते इदं पर्व रंगोत्सवरूपेण विञ्चित्भेदेन सह मान्यते। भोजपुरीशैल्यां तु अस्योत्सवस्य विशेषः आनन्दः अनुभूयते। इदं वासन्तिकं पर्व विविधरागरंगैः, गीतैः, अन्नाहुतिभिः, विविधैः पक्वान्नैः, आमोदैः, प्रमोदैः च समाजे ऐक्यम् प्रेमयुक्तम् आनन्दमयं वातावरणं जनयति। इदं पर्व विदेशेषु अपि तत्रत्यैः भारतीयैः हर्षातिरेकेण मान्यते। अस्मिन् पर्वणि देशस्य विभिन्नसंस्कृतीनां मेलनं भवति। मानवीयभावनायाः राष्ट्रैकतायाः उद्रेकः अस्मिन् पर्वणि सर्वत्र दृश्यते।

## पाठगतप्रश्नाः 25.3

1. अधः कथनेषु यत् कथनं सत्यम् तत् (✓) इति चिह्नेन यत् च असत्यम् तत् (×) इति चिह्नेन चिह्नितं कुरुत

   (क) परियोजना–निर्माणकाले चित्रप्रदानम् नैव आवश्यकम्।

   (ख) कस्यापि विषयस्य परिज्ञानं दातुं या परियोजना निर्मीयते, तस्यां स्वविमर्शः अपेक्षितः वर्तते।

   (ग) समस्यामूलक–परियोजनाः केवलं तथ्याधारिताः भवन्ति।

   (घ) होलिकाग्नौ जनाः केवलं पक्वान्नं प्रक्षिपन्ति।

   (ङ) होलीपर्वणि राष्ट्रैक्यं दृष्ट्वा भारतीयसंस्कृतेः गरिमा दृश्यते।

   (च) परियोजना केवलं कल्पनाधारिता भवति।

## 25.7 परियोजनालेखनस्य विषयाः

भवान् अन्याः अपि परियोजनाः निर्मातुं शक्नोति। परियोजना तु दश पृष्ठतः पञ्चदशपृष्ठपर्यन्तं भवेत्। स्वरुचि–सुविधानुसारं च कमपि विषयं चित्वा परियोजनानिर्माणे तत्परः भवेत्।

**परियोजनालेखनसम्बन्धिनः केचन प्रमुखविषयाः**

(i) नगरेषु प्रदूषणसमस्या

(ii) जनसंख्यावृद्धिः, जीवनसुविधासु तस्याः दुष्प्रभावः

(iii) राजनैतिकः भ्रष्टाचारः

(iv) न्यायालयेषु लम्बिताः विवादाः अपराधवृद्धिश्च

(v) भिक्षावृत्तौ पातिताः बालाः

(vi) वयस्कानां जीवनरक्षणम्





**शुद्धज्ञानवर्द्धकविषयसम्बद्धाः परियोजनाः**

(i) गणतन्त्रदिवससमारोहः

(ii) भारते विजयदशमी (दशहरा) पर्व

(iii) कुम्भपर्वणः परम्परा

(iv) भारतस्य पर्वताः

(v) भारतस्य आदिवासिनः

(vi) आधुनिकयुगे यातायातस्य साधनानि

(vii) ग्रामेषु नारीणां स्थितिः

(viii) भारतीयपर्वसु सांस्कृतिक–एकता

(ix) संस्कृतवाङ्मये राष्ट्रैकतायाः सूत्राणि।

## 25.8 किम् अधिगतम्

- परियोजना कस्याः अपि समस्यायाः निदानाय अथवा कस्यापि विषयस्य सम्यक् अवगतिं प्रदातुम् इति उद्देश्येन निर्मीयते।
- परियोजना तथ्याधारिता भवति, एतस्यां भावनायाः न कोऽपि अवसरः।
- परियोजनानिर्माणात् पूर्वं विषयस्य सम्यक् ज्ञानं, तत्सम्बन्धित–तथ्यानां चित्राणां मानाङ्कानाम् (आंकड़े) ग्राफिकम्, विज्ञापनानाञ्च संग्रहः आवश्यक भवति।
- स्थूलतः परियोजना द्विधा निर्मीयते– एका कार्यपरियोजना द्वितीया च शैक्षिक परियोजना।
- समस्यामूलकपरियोजनायां भवान् स्वपरामर्शं दातुं शक्नोति, परं कस्यापि विषयस्य ज्ञान–प्रदात्री या परियोजना भवति, तस्यां स्वपरामर्शः नापेक्षते।
- शैक्षिकपरियोजनाः तु खेलभावनया नूतनं नानाविधं शिक्षणं शिक्षितुम् भवतां कृते अवसरं प्रयच्छन्ति।

## 25.9 पाठान्तप्रश्नाः

1. परियोजना का भवति?
2. परियोजनायाः स्वरूपं स्पष्टयत।
3. परियोजना निर्माणकाले केषां विषये ध्यानम् आवश्यकम्?



टिप्पणी

4. परियोजनायां भावनायाः किमपि महत्त्वं न भवति, स्पष्टयत।

5. परियोजनायाः महत्त्वम् स्वशब्देषु प्रस्तौतु।

6. परियोजना अनुच्छेदयोः लेखने कः भेदः स्पष्टयत।

7. समस्याप्रधानविषयम् अधिकृत्य शुद्धज्ञानवर्द्धकं विषयम् अवलम्ब्य च निर्मितपरियोजनयोः कः भेदः भवति? केषाञ्चित् चतुर्णाम् उल्लेखं कुरुत।

8. 'वनसंरक्षणेन लाभः' इति विषयमाधृत्य एका परियोजना निर्मीयताम्।

9. प्रमुखविभागानां/संस्थानाम् दश आदर्शवाक्यानि (यथा–योगक्षेमं वहाम्यहम्, अहर्निशं सेवामहे, विद्ययामृतमश्नुते इत्यादिकम्) आधृत्य एका परियोजना सज्जीक्रियताम्।

## 25.10 उत्तराणि

**पाठगतप्रश्नाः**

**25.1** 1. (क) 2. (ख) 3. (ग)

**25.2** 1. (घ) 2. (ख) 3. (घ)

**25.3** 1. (क) ×
(ख) ×
(ग) ✓
(घ) ×
(ङ) ✓
(च) ×

**25.9 पाठांतप्रश्नाः**

स्वयं करोतु